॥ ओ३म् ॥
सम्पन्नतरमेवान्नं दरिद्रा भुञ्जते सदा।
क्षुधात्स्वादुतां जनयति या चाढ्येषु सुदुर्लभा॥
शीलं प्रधानं पुरूषे तद्यस्येह प्रणश्यति।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः॥
( विदुरनीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23
Posting Date.: 4-5, 19-20 of Every Month
सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
अवृत्तिर्भयमन्त्यानां मध्यानां मरणाद्भयम्।
उत्तमानां तु मर्त्याना-मवमानात्परं भयं॥
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते।
जीर्यत्यपि हि काष्ठानि दरिद्राणां महीपते॥
( विदुरनीति )

卐 वर्षम्-१२ 卐 अंकः-१९ ( २८३ ) नवदेहली 卐 १ अप्रैलमासः २०२३तः १५ अप्रैलमासः २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८


## पतंजलिः योगेन आयुर्वेदेन स्वदेशिना सह शिक्षा-धर्मस्य प्रमाणिकतया निर्वहनमकरोत्-गृहमंत्री अमितशाहः

हरिद्वारम्। पतंजलि द्वारा सन्यासदीक्षा महोत्सवावसरे केंद्रीयगृहमंत्री श्रीअमितशाहः पतंजलि विश्वविद्यालयम् आगतः तं स्वामीरामदेवः आचार्य बालकृष्णः च स्वागतकृतवन्तौ। ततस्तेन विश्वविद्यालयस्य नवीन परिसरः लोकार्पितः। विगतनवदिनेभ्यः क्रियमाणे चतुर्वेदीय महापुराण




यज्ञे पूर्णा आहुतिर्दत्ता। अपि श्रोतघ्न् संबोधयता उक्तं योगः,आयुर्वेदः स्वदेशीआंदोलनं इत्येतैः सह पतंजलिः शिक्षाक्षेत्रे अपि उल्लेखनीय कार्यमकरोत्। भारतीय शिक्षा परिषद्, पतंजलिगुरुकुलम्, आचार्यकुलं, पतंजलिविश्वविद्यालयः तथा च पतंजलिआयुर्वेदमहाविद्यालयः इत्येषां माध्यमेन मूल भारतीय परंपरया सहैव पुरातन ज्ञानस्य नूतनोर्जासंचारमकरोत् स्वामीरामदेवः कथितवान् यत् अस्माभिरेतैः उपक्रमैः सह स्वदेशीकरणं साकारीक्रियते। अस्मज्जीवनेन सह पूर्ण विश्वे श्रीरामः प्रतिष्ठितः भवतु। राममंदिर स्थापना धारा 370 समाप्तिं कृत्वा प्रधानमंत्री देशाय सुगंध प्रदत्तवान्। अस्मिन् अवसरे उत्तराखंडस्य मुख्यमंत्री पुष्करसिंहधामी उक्तवान् यत् संत परंपरायाम् एकं भारतं, श्रेष्ठं भारतम् इत्यस्य परिकल्पनां साकारीकर्तुं माध्यमः अवर्तत। कार्यक्रमे हरिद्वार सांसदः डॉ रमेशपोखरियालः निशंकः, उत्तराखंडस्य उच्चशिक्षामंत्री धनसिंह रावतः, भारतीय शिक्षापरिषदः कार्यकारीअध्यक्षः एन.पी.सिंहः, पतंजलिविश्वविद्यालयस्य प्रतिकुलपतिः प्रो. महावीरअग्रवालः चेत्यादयः गणमान्याः उपस्थिताः आसन्।

## राजस्थानसाहित्योत्सवः सम्पन्नः

जोधपुर। राजस्थानस्य जोधपुर नगरे मार्च मासस्य अन्तिम सप्ताहे समायोजितम् राजस्थान साहित्योत्सवे राजस्थान संस्कृत अकादमी एवं पद्म श्री नारायण दास संग्रहालय एवं पाण्डु लिपि शोध संस्थानयोः




संयुक्त तत्वाधाने पाण्डु लिपि प्रदर्शनी व्यवस्थापिता। प्रदर्शन्या मुख्यान्याकर्षणान्यासन् - षोडश शताब्द्या ग्रन्थाः, भोज पत्रीय ग्रन्थाः, ताम्र पत्राणि, वस्त्राङ्कित ग्रन्थाः च। प्रदर्शन्याः शुभारंभम् शिक्षा एवं कला संस्कृति विभागयोः मन्त्रिवर्याः डॉख बीख डीख कल्ला महोदया, राजस्थान संस्कृत अकादम्या अध्यक्षा सरोज कोचर महोदया, डॉ ख रीमा हूजा, निदेशकः संजय झाला महोदयाश्च कृतवन्तः। प्रदर्शन्याः समन्वयकः डॉख सुरेन्द्र कुमार शर्मा विद्वज्जनानामौतसुक्यम् दृष्टवान्। जन समुदायः ग्रन्थानाम् अवलोकनम् कृत्वा भारतीय ज्ञान परम्परायाः संरक्षण विषये प्रसन्नताम् व्यक्तवान्।

## ज्ञानपरम्परायां शास्त्रस्य अत्यन्तं महत्त्वपूर्णं योगदानम्- प्रधानमंत्री नरेंद्रमोदी

वाराणसी (अजय कुमार मिश्रा)। केंद्रीय संस्कृत विश्वविद्यालय. दिल्ली द्वारा वाराणस्याम् आयोजितं अखिल भारतीय शास्त्रीय स्पर्धा कार्यक्रमम् ऑनलाइन संबोधयन् यत् प्रधानमंत्री नरेंद्र मोदी उक्तवान् यत् कला. संस्कृति ज्ञान संस्काराणाम् आधारः संस्कृतम् आसीत्।




संबंधेस्मिन् केंद्रीय संस्कृत विश्व विद्यालयः विविध कलानां प्रचारं प्रसारं तथा शिक्षा क्षेत्रे उल्लेखनीयं कार्यं करोति। प्रधान मंत्री कथितवान् यत् अस्माकं ज्ञान परंपरायां शास्त्रस्य अत्यंतं महत्वपूर्ण योगदानम् अवर्तत। तत्र अवसरे कुलपतिः श्रीनिवास बरखेडी प्रधानमंत्रिणः उद्बोधनं संस्कृत परिवाराय महत्वपूर्णं मन्वानः उक्तवान् यन्नेतृत्वे संस्कृत पुनः व्यापक रूपेण वैश्विकं भवेत्तदर्थं प्रत्येकं संभव प्रयासः करिष्यते। कार्यक्रमे विभिन्न प्रांतेभ्यः आगताः प्रतिभागिनः संस्कृत विद्वांसश्च भागं गृहीतवन्तः।

## एकादशी-श्रीमद्भगवद्गीता राष्ट्रिया व्याख्यानगोष्ठी सुसम्पन्ना

वृत्तप्रेषिका- डॉ. नेहामिश्रा

संस्कृतविभाग-महात्मागांधी- केन्द्रीय-विश्वविद्यालयः मोतिहारी, पूर्णिया कालेज पूर्णिया बिहारः, चातुर्वेदसंस्कृतप्रचारसंस्थानं, काशी, उत्तरप्रदेशः इत्येतेषां संयुक्ततत्त्वावधाने विश्वसंस्कृतकुटुम्बकम् आमुखपटलसमूहस्य आनलाईन पाक्षिकीयं षष्ठी राष्ट्रिया गोष्ठी 18/3/2023 दिनाङ्के, शनिवासरे सफलतया सम्पन्ना अभूत्।

कार्यक्रमेऽस्मिन् सभाध्यक्षरूपेण प्रो० प्रसूनदत्तसिंहः, अधिष्ठाता मानविकी एवं भाषासंकायः, म.गा. केन्द्रीय-विश्वविद्यालयः मोतिहारी। महोदयः सम्पूर्णव्याख्यानस्य साररूपेण व्याख्यानम्




अकरोत्। सः अवदत् यत् भारतस्य परिचयः गीतावेदादिग्रन्थमाध्यमेन एवास्ति।

मुख्यवक्त्री प्रो० विभा अग्रवाल पूर्व अध्यक्षा, संस्कृत पालि एवं प्राकृतविभागः कुरुक्षेत्र-विश्वविद्यालयः, हरियाणा। महोदया श्रीमद्भगवद्गीतायां त्रिगुणस्वरूपम्, इतिविषये सारगर्भितं व्याख्यानमकरोत्। सा अवदत् गीतायां यत् त्रिगुणस्वरूपं वर्णितमस्ति तस्य वैज्ञानिकता अस्ति। अष्टधा प्रकृतिविषये सा महोदया प्रकाशनम् अकरोत्। त्रिगुणविषये एव सम्पूर्ण संसारस्य आधारः अस्ति। मनुष्यः त्रिगुणभोक्ता अस्ति। त्रिगुणविषयात् भिन्नः अस्ति ईश्वरः, यः चेतनरूपः अस्ति। विशिष्टवक्ता डॉ. कृष्णमोहनपाण्डेयः, वेद विभागाध्यक्षः सनातनधर्म आदर्श संस्कृतमहाविद्यालयः डोहगी,ऊना हिमाचलप्रदेशः। महोदयः श्रीमद्भगवद्गीतायां जीवनप्रबन्धनं विषयेऽस्मिन् व्याख्यानमकरोत्। सः अवदत् गीतां बिना जीवनं नास्ति। न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः श्लोकेऽस्मिन् वर्णितमस्ति जीवने अपि सर्वदा एवमेव भ्रमः भवति किन्तु

शेषभागः चतुर्थपुटे

# कादम्बिनीविमर्शात्मिका राष्ट्रिया संगोष्ठी

-डॉ. लक्ष्मीकान्तविमलः, नवदेहली

नवदेहल्यां स्थितं श्रीशंकरशिक्षायतनम् (वैदिकशोधसंस्थानम्) तथा च श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्वविद्यालयस्य वास्तुशास्त्रविभागः इत्यनयोः संयुक्त-तत्त्वावधाने मार्चमासस्य १८ तमे दिनांके २०२३ तमे खृष्टाब्दे विश्वविद्यालयस्य वाचस्पतिसभागारे प्रातः १० वादनतः सायं ०५:३० वादनपर्यन्तं 'कादम्बिनीविमर्श' इति विषयात्मिका एकदिवसीया राष्ट्रिया संगोष्ठी समायोजिता सञ्जाता।

विद्यावाचस्पति-पण्डित-मधुसूदन-ओझा-प्रणीतं कादम्बिनी-नामकं ग्रन्थम् अधिकृत्य संगोष्ठीयं सुसंपन्नतां गता। अस्यां संगोष्ठ्यां बहवः विद्वांसः व्याख्यानं प्रस्तुतवन्तः। कादम्बिनी इति नामके ग्रन्थे वृष्टिविज्ञानस्य प्रतिपादनम् अस्ति। अस्मिन् ग्रन्थे चत्वारः अध्यायाः विलसन्ति। प्रथमस्य अध्यायस्य नाम गर्भाध्यायः अस्ति, तत्र ५४ कारिकाः, द्वितीयस्य अध्यायस्य नाम द्वादशमासाधिकारः अस्ति, तत्र ६४६ कारिकाः, तृतीयस्य अध्यायस्य नाम निमित्ताध्यायः अस्ति, तत्र ४०९ कारिकाः तथा च अन्तिमस्य चतुर्थस्य



अध्यायस्य नाम शकुनाध्यायः अस्ति, अस्य अपरः नाम तत्कालाध्यायः अस्ति, तत्र ३७४ कारिकाः सन्ति। अनेन प्रकारेण अस्मिन् कादम्बिनीग्रन्थे १४५६ कारिकाः उपलभ्यन्ते। अस्यां कारिकायां रामायणस्य, पुराणस्य, मनुस्मृतेः उद्धरणं समाहितम् अस्ति। गर्भस्य अर्थः कारणं भवति। मेघस्य निर्माणे किं किं कारणं विद्यते। द्वादश-मास-नामकाध्याये कार्तिकमासात् प्रारभ्य आश्विनमासपर्यन्तं वृष्टिसम्बन्धिनः विषयाः समाहिताः सन्ति। निमित्ताध्याये वायोः, विद्युतः मेघस्य विषयाः समाहिताः विद्यन्ते। एतानि तत्त्वानि वृष्टिं प्रति कारणानि सन्ति। शकुनाध्याये ग्रहाणां विवेचनं विद्यते।

संगोष्ठ्याः उद्घाटनसत्रे वाराणसीनगरस्य काशी-हिन्दू-विश्वविद्यालस्य ज्योतिषविभागस्य पूर्वाध्यक्षाः मुख्यवक्तारः प्रो. रामचन्द्र-पाण्डेय-महाभागाः आसन्, ते कथितवन्तः यत् इयं कादम्बिनी वृष्टिविद्यायाः प्रतिपादिका अस्ति। अस्य ग्रन्थस्य अध्ययनात् अध्यापनात् शोधकार्यात् ग्रन्थेऽस्मिन् वर्णितायाः विद्यायाः प्रचारः प्रसारः भविष्यति। स्वकीये उद्बोधने तैः भणितम् यत् यो मेघः कठिनेन वृष्टिं करोति तस्य मेघस्य नाम पुस्करः अस्ति। यस्मिन् मेघे वृष्टियोग्यं जलं न भवति स मेघः आवर्तः अस्ति। अधिकवृष्टियोग्यः मेघः संवर्तकः अस्ति च कृषियोग्यः मेघः द्रोणः अस्ति-

**पुष्करो दुष्करोदः स्यादावर्तो निर्जलो घनः ।**
**बहूदकस्य संवर्तो द्रोणः सस्यप्रपूरकः।। कादम्बिनी, पृ.१३५, का. ४३**

कार्यक्रमे विशिष्टातिथयः जम्मूनगरस्य रणवीर-परिसरस्य केन्द्रीय-संस्कृत-विश्वविद्यालयस्य पूर्वनिदेशकाः प्रो. वासुदेवशर्माणः आसन् । तैः उक्तं यत् ग्रन्थोऽयं अत्यन्तम् उपादेयः अस्ति। इमं ग्रन्थम् आधारीकृत्य शोधकार्यस्य महती आवश्यकता विद्यते। ज्योतिषशास्त्रस्य अनुसारेण वृष्टिकारकात् ग्रहयोगात् एव हि वृष्टिः सञ्जायते।

उद्घाटनसत्रे स्वागतवक्तव्यं कुर्वन्तः श्रीलाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य वास्तुशास्त्रविभागस्य अध्यक्षाः प्रो. देवी-प्रसाद-त्रिपाठिवर्याः कथितवन्तः यत् इयं राष्ट्रिया संगोष्ठी कादम्बिनीग्रन्थम् अवलम्य समायोजिता अस्ति। यस्मिन् ग्रन्थे वृष्टिविद्या प्रमुखा अस्ति। भारतीयसमाजः कृषिप्रधानभूतः यत्र वृष्टेः प्राधान्यम् अस्ति। वृष्टेः अन्नं जायते। समुचिताय कृषिकार्याय वृष्टिः आवश्यकी । अत एव अयं कादम्बिनीग्रन्थः वृष्टिविद्यायाः प्रतिपादकः अस्य अध्ययनम् अत्यन्तम् आवश्यकम् अस्ति।

श्रीशंकर-शिक्षायतनस्य समन्वयकाः एवं च जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानस्य आचार्याः प्रो. सन्तोष-कुमार-शुक्ल-महोदयाः विषयप्रवर्तनक्रमे अकथयन् यत् पण्डित-मधुसूदन-ओझा-महोदयैः भारतीय-ज्ञान-परम्परायाः ग्रन्थात् उद्धरणम् उपस्थापितम्। तान् उद्धरणान् समाहृत्य वृष्टिसंबन्धिनः सिद्धान्ताः विवेचिताः सन्तिः। ग्रन्थस्य आदौ एव ग्रन्थकाराः लिखन्ति यत् विश्वहिताय ग्रन्थोऽयं लिख्यते मया । पं. ओझामहाभागः वाल्मीकिरामायणस्य वचनं संगृह्य कथयति यत् आकाशः सूर्यस्य किरणात् कार्तिकमासात् आषाढमासपर्यन्तं अष्टमासावधौ गर्भधारणं करोति। तस्मिन् गर्भे समुद्रस्य रसायनं जलं वृष्टिं करोति-

**अष्टमासाधृतं गर्भं भास्करस्य गभस्तिभिः।**
**रसं सर्वसमुद्राणां द्यौः प्रसूते रसायनम् ।। तत्रैव, पृ.३, का.९**

श्रीलाल-बहादुरशास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य पूर्वकुलपतयः प्रो रमेश-कुमार-पाण्डेयमहोदयाः उद्घाटनसत्रस्य अध्यक्षाः आसन्। तैः प्रतिपादितं यत् महाकविकालिदासैः मेघदूतकाव्ये मेघस्य अनेकानि स्वरूपाणि उद्घाटितानि। महान् काव्यशास्त्री पण्डितराजः जगन्नाथः रसगङ्गाधरस्य मङ्गलपद्ये कादम्बिनीशब्दस्य प्रयोगं कृतवान्।

प्रथमसत्रे मुख्यवक्तारः प्रो. देवीप्रसादत्रिपाठिवर्याः अकथयन् यत् आधुनिकमौसमविज्ञानदृष्ट्या प्राचीनवृष्टिविज्ञानस्य सिद्धान्तस्य ज्ञानम् अस्माकम् कृते अत्यन्तम् आवश्यकम् अस्ति। अस्मिन् ग्रन्थे विभिन्नानि निमित्तानि प्रतिपादितानि सन्ति। यथा- यदा आकाशे श्यामः रक्तः पीतः मेघः स्यात् तदा सुवृष्टिः भविष्यति इति अवधेयम्-

**श्यामो रक्तोऽथवा पीतः शान्तायां दिशि दृश्यते ।**
**स्निग्धो मन्दगतिर्मेघस्तदा विद्याज्जलागमम् ।। तत्रैव,, पृ.१३६, का.५५**

द्वितीयसत्रे वाराणसीनगरस्य काशी-हिन्दू -विश्वविद्यालयस्य, भारतीय-प्रौद्योगिकी-संस्थानस्य, भूभौतिकीविभागस्य प्रो.मनोज-कुमार-श्रीवास्तव-महोदयाः मुख्यवक्तारः आसन्। ते आधुनिक-मौसम-विज्ञानस्य अनेकपक्षस्य विस्तारेण चर्चां कुर्वन्तः कादम्बिनीग्रन्थे वर्णिते वृष्टिविषयके तथ्ये आधुनिक-विज्ञानस्य उपयोगितां प्रदर्शितवन्तः।

कार्यक्रमस्य द्वितीये सत्रे बहवः विद्वांसः शोधपत्रस्य वाचनं कृतवन्तः। तेषां नामानि सन्ति- दिल्लीविश्वविद्यालयस्य, संस्कृविभागस्य सह-आचार्यः डॉ. उमाशंकरः, श्रीलाल-बहादुरशास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य वेदविभागस्य सह-आचार्यः डॉ. सुन्दर नारायणझा, डॉ. हनुमानमिश्रश्च, श्रीलाल-बहादुरशास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य वास्तुशास्त्रविभागस्य सहायकाचार्याः- डॉ. प्रवेशव्यासः, डॉ. दीपक वशिष्ठः, डॉ. नवीन पाण्डेयः च।

कार्यक्रमस्य शुभारम्भः अतिथिभिः दीपप्रज्वालनेन सरस्वती-प्रतिमायां माल्यार्पणेन च सञ्जातः एवं वैदिकशान्तिपाठेन कार्यक्रमः संपूर्णतां गतः। अस्यां संगोष्ठ्याम् अनेके प्रतिभागिनः विद्वांसः शोधच्छात्राश्च सोत्साहेन भागं गृहीतवन्तः।

# "सरलसंस्कृतसम्भाषणशिक्षक-प्रशिक्षणस्य समापनसमारोहः"

- नूतनविष्णुः रेग्मी(प्रकृतिसाधुः)

उत्तरप्रदेशशासनाधीनस्य भाषाविभागस्य अङ्गभूतेन लखनऊस्थेन उत्तरप्रदेशसंस्कृतसंस्थानेन आयोजितायाः "गृहे गृहे संस्कृतम्" इति योजनायाः अन्तर्गतस्य "सरलसंस्कृतसम्भाषणणशिक्षकप्रशिक्षणम्(१६/०३/२०२३ तः २२/०३/२०२३) इत्यस्य समापनसमारोहः" निरालानगरस्थे जे.सी. गेस्टहाउस मध्ये २२/०३/२०२३ तमे दिनाङ्के सायं ४ वादने अभवत्। उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः अस्य समारोहस्य अध्यक्षपदमलङ्कृत्य ,योजनायाः अस्याः पर्यवेक्षिका डा. चन्द्रकलाशाक्या च संयोजिकात्वेन अधिमञ्चं विराजमाने आस्ताम् । मञ्चे ताभ्यां सह प्रशिक्षणवर्गस्यास्य प्रशिक्षणप्रमुखः




सुधिष्ठकुमारमिश्रः, संस्कृतभाषाविशेषज्ञः टीकारामपाण्डेयः ,प्राशासनाधिकाधिकारिणौ दिनेशमिश्रः , जगदानन्दझा चेत्येते आसन्। सर्वादौ प्रशिक्षू आस्था संस्थानगीतिकां प्रस्तुतवती। समारोहस्यास्य मंचसंचालकौ प्रशिक्षू सूर्यप्रकाशः, रमान्यौपाने च आस्ताम्। सर्वादौ प्रशिक्षू मुकेशचन्द्रदीपौ वैदिकमङ्गलाचरणं कृतवन्तौ । तदैव मञ्चस्थाः अतिथयः दीपप्रज्ज्वालनं, शारदार्चनां च कृतवन्तः। ततः परं प्रशिक्षिका पूजावाजपेयी स्वागतगीतं प्रस्तुतवती।

अनन्तरं सुधिष्ठमहोदयेन स्वागतभाषणं विहितम्। तत्र तेन सर्वेषां मंचस्थानां सर्वेषां अतिथीनां स्वागतं पुष्पमालारांकवस्मृतिचिह्नप्रदानेन कारितम् । तथैव योजनासमन्वयकस्य, प्रशिक्षणसमन्वयकस्य ,प्रशिक्षणसमन्वयिकायाः, भाषाविशेषज्ञस्य,तात्कालिकसमन्वयकस्य, प्रशिक्षकाणां, प्रबन्धकस्य च स्वागतं निदेशकद्वारा प्रमाणपत्रस्मृतिचिह्नप्रदानेन तेन कारितम् । ततः तस्यापि स्वागतं निदेशकेन कृतम्।ततः कार्यालयीयजनानामपि स्वागतं डा.चन्द्रकलाशाक्या कारितवती ।

वर्गस्यास्य सप्तदिनानां प्रतिवेदनं प्रशिक्षकः नूतनविष्णुः रेग्मी लिखितवान्। प्रशिक्षकः अमितसामवेदी संगणकसंयोजकत्वेन तस्य सहायतां कृतवान् ।टीकाराममहोदयश्च सर्वस्यापि प्रूफ-दर्शनं कृतवान् ।प्रशिक्षणप्रमुख्खेन प्रतिवेदनस्योल्लेखः अपि मंचतः कृतः। ततः परं प्रशिक्षुः तरुणः प्रशिक्षणानुभवमकथयत्। प्रशिक्षुः रमान्यौपाने" कन्दुकेन क्रीड़न्ति बालकाः" इति अभिनयगीतं गापितवती।प्रशिक्षुः संध्यागुप्ता प्रशिक्षणानुभवमेव परन्तु कथामाध्यमेन साभिनयं श्रावितवती। तत्पश्चात् तात्कालिकप्रशिक्षणसमन्वयकः धनञ्जयसागरमिश्रः "मातुलग्रामं गच्छेम" इति अभिनयगीतमश्रावयत।संयोजिका डा. चन्द्रकला सर्वेषां धन्यवादं कृतवती यत् ते योजनया सह आगताः। सा प्रशिक्षणप्रमुखं सुधिष्ठमहोदयम् "रक्तबीजः" इति उपाधिनालङ्कृतवती अर्थात् "सः यत्र यत्र गच्छति तत्र स्व-सदृशान् बहून् संस्कृतज्ञान् उत्पादयति" इति।

टीकारामपाण्डेयमहोदयेन उक्तं यत् " अस्माकं एतत् कार्यं तु दैवीयं कार्यम्। वयं सर्वे अत्र देवेन योजिताः।वयं निरहङ्कारं कार्यं कुर्मश्चेदेवास्माकमूर्ध्वगतिः भवति । नो चेत् अधोगतिः तु निश्तितमेव।बहु किमपि करणीयमस्ति संस्कृतस्य कृते अस्माभिः एददनन्तरम् ।एतत् तु प्रारम्भः एव।" इति।तदनन्तरं निदेशकेन स्वोद्बोधने उक्तम् यत् संस्कृज्ञैः हीनभावनया कदापि न भाव्यम्।संस्थानं बह्वीनां योजनानां संचालनं करोति । तत्र तत्र सर्वेऽपि स्वयोग्यतानुसारमागत्य कार्यं कर्तुं शक्ष्यन्ति।ततः परं योजनायाः अस्याः समन्वयकेन अनिलगौतमेन सर्वेषां प्रशिक्षूणां नामानि स्वीकृत्य निदेशकेन तेभ्यः प्रमाणपत्राणि वितरितानि।तत्र योजनायाः कृते निर्मितस्य विंशतिदिनानां पाठ्यक्रमानुसारं निर्मितस्य पाठ्यपुस्तकस्यापि विमोचनं मंचस्थैः कृतम्।पुस्तकस्य निर्माणं सुधिष्ठमहोदयस्य टीकाराममहोदयस्य च निर्देशने विमलेश-राधा-धीरजाः एतेषां त्रयाणां नेतृत्वे तत्रत्यानां प्रशिक्षकाणां लेखनेन जातम्। ततः परं सर्वेषां धन्यावादज्ञापनं जगदानन्दझामहोदयेन कृतम् । अन्ते शान्तिमन्त्रेण सप्तमदिवसीय -आवासीय-प्रशिक्षणस्य एवं च तस्य समापनसमारोहस्य समापनमभवत्। अन्ते संस्थानाधिकारिभिः सह सर्वेषां सामूहिकचित्रकर्षणव्यवस्थापि संस्थानेन कृतम् आसीत् । अनन्तरं परिशीलितानाम् प्रशिक्षूणाम् अभ्याससंचिकानां तेभ्यः प्रशिक्षकैः प्रत्यर्पितम्।ततः परं सर्वे चायं पीत्वा भोजनपाथेयं च स्वीकृत्य स्वं स्वं निवासस्थानं ससुरक्षितं प्राप्तवन्तः।


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# सम्पादकीयम्

सम्मान्या: सुरभारतीसमुपासका:!

सादरं नमोनम:।

चौत मासस्य प्रारंभे रामनवम्या: उत्सव: न केवलं भारते अपितु विश्वस्य द्वादश देशेषु आस्थया समाचर्यते स मर्यादापुरुषोत्तमस्य श्री रामस्य चरित्रोद्देश्यं जीवने मद: , काम:, क्रोध:, मोहश्चेत्यादीनि इव अनेकानि कष्टानि निवार्य आदर्श जीवनस्य स्थापना वर्तते। रामचरितमानसे उक्तं यत् संपूर्ण जगत् राममयम् । समग्रे जगति रामदर्शनं भक्ते: पराकाष्ठा। समग्रजगत् एकस्मिन्नेव तत्वे निहितम् । तस्यैव प्रकाश: अयम् । रामस्य भक्ति: राममयत्वस्य च आशय: एष: अपि यत् तदनुगामिषु सद्गुणानां समावेशोऽपि स्यात्। विरोध: , बैमनष्यस्य च स्थाने आदर सम्मानयोर्भावना जागरिष्यति। राम: समदर्शी, दीनबंधु:, भक्तवत्सल: करुणाकर: च कथ्यते। रामभक्त: अपि तद्भावै: परिपूर्ण: भविष्यति। लोकमानसे राम: अद्यापि व्याप्त:। रामनवमी, दशहरा च इव उत्सवौ अद्यापि उन्नत: प्रतीक:। परंतु अयमपि दु:खस्य विषय: यत् एकत्र पूर्णे विश्वे राम: एक: मर्यादापुरुषोत्तमरूपेण दृष्ट: वर्तते। अपरत्र अस्माकं देशे भारते रामम् आधृत्य विवादस्थिति: उत्पन्ना। अपि च रामस्य अस्तित्वमपि उपेक्षित: स विजयादशम्या: शोभायात्रायां पूर्णदेशस्य बहुषु स्थानेषु जातासु हिंसा शिलाखंडक्षेपणम् इत्यादिघटना: पूर्ण: देश: लज्जित:। चरमपंथिन: मर्यादा पुरुषोत्तम रामस्य सर्वा: मर्यादा: अतिक्रामन्ति। बहुधा ये रामं न जानन्ति ते विरोधं कुर्वन्ति स वस्तुत: राम: कस्यचिद् धर्म:, जाति:, संप्रदाय: इत्येतस्य भावनात: ऊपरि वर्तते स मानवताया: तस्मिन् आयामे स्थापित: , य: करुणा, प्रेम, दया, भक्तिश्च इत्येभ्य:विश्व बंधुत्वस्य भावना जागर्ति।

प्रथमपुटस्य शेषभाग:

## एकादशी-श्रीमद्भगवद्गीता....

तस्य समाधानं श्रीमद्भगवद्गीतायामेव अस्ति।मनसि दृढ़निश्चयं कृत्वा एव कार्य करणीयं । तदा अवश्यमेव सफलता भविष्यति। बुद्ध्या कार्य कुर्वन्तु न तु मनसा।

सहसमन्वयक: डॉ० मोहम्मद कमाल:, प्राचार्य:, संयुक्तसंयोजिका डा० सविताओझा संस्कृतविभागाध्यक्षा पूर्णिया कालेज पूर्णिया. कार्यक्रमेऽस्मिन् मंङ्गलाचरणं कृतवान् डा० पूरन चन्द्र जोशी, वेदाचार्य: श्रीमाता वैष्णोदेवी गुरुकुलं, श्राईन बोर्ड कटरा जम्मू कश्मीर, गीताश्लोकपाठं कृतवती अर्पिता शर्मा, ओम् बाल संस्कारशाला भदोही। सम्पूर्णकार्यक्रमस्य सूत्रधार: संयोजकश्च डॉ० चन्द्रकान्तदत्त शुक्लवर्य: कार्यक्रमस्य सञ्चालनम् अकरोत्। समन्वयक: डॉ० श्यामकुमारझा: संस्कृतविभागाध्यक्ष: म.गा.के. विश्वविद्यालय: मोतिहारी, अतिथीनां जिज्ञासूनाञ्च स्वागतमकरोत्। स: अवदत् यत् ये कार्यक्रमस्य सूत्रधारा: सन्ति डॉ चन्द्रकान्तदत्तशुक्लवर्या: ते संस्कृतभाषाया: समर्पितसेवका: सन्ति ते न केवलं कार्यक्रमस्य संयोजका अपितु ते संस्कृते एव जीवन्ति।

धन्यवादज्ञापनं कार्यक्रमस्य संयुक्तसंयोजिका डॉ. सविता ओझा विभागाध्यक्षा संस्कृत-पूर्णिया कालेज पूर्णिया महोदया अकरोत्। अन्ते संयोजनसदस्य: डॉ. शम्भुत्रिपाठी संस्कृतप्रचारकुलगीतं प्रस्तुतुवान्।

कार्यक्रमे प्रो० शरदिन्दु कुमार त्रिपाठी, प्रो०नवलता, डॉ. नीरज तिवारी, डा०प्रमा द्विवेदी, आचार्य ज्ञानेन्द्र:, डा. प्राङ्गेशकुमारमिश्र:, डा. वत्सला त्रिपाठी, प्रो० मञ्जुलता शर्मा, डा०आभाद्विवेदी, डॉ ० अरविन्दतिवारी, रोशनमौर्य:, पूजा, प्रिया, शालिनी, आकाङ्क्षा, अङ्किता,मधु, डॉ. राहुल कुमार झा:, डॉ. तेजप्रकाशचतुर्वेदी, डा. सूर्यप्रकाशसिंह:, डॉ. बृजेश पाण्डेय:, डा. सूर्यकान्त त्रिपाठी, डॉ आरुणेय मिश्र:, डा. इन्द्रेश पाण्डेय:, डॉ. गीता शुक्ला, डॉ. उपेन्द्रनाथपाण्डेय:, डॉ. प्रदीपकुमारमिश्र:, अनामिका सिंह, अनन्या श्रीवास्तवा, दीनदयालशुक्ल:, डॉ. आभा द्विवेदी, डॉ. प्राङ्गेशमिश्र:, डॉ. मिताली मीनू, डॉ. विश्वेश वाग्मी, सुदर्शनश्रीनिवासशाण्डिल्य:, मोहन जोशी, सङ्गीता शर्मा, ऋषिकान्त उपाध्याय, कृष्णप्रिया हाती, महक, डॉ. सन्ध्या ठाकुर, किरन उपाध्याय, पुष्पराज शर्मा, अभिषेक:, डा. रामकेश्वर तिवारी, आनन्द माधव, डॉ. धनन्जय मणि, रमेशचन्द्रा, अनेके जिज्ञासव: गीताप्रिया: बन्धव: समुपस्थिता: आसन्।

( वेदविज्ञानम् )

# सप्तप्राणात्मकम् अध्यात्मसंस्थानम्



डॉ. रामदेव साहू
प्रोफेसर (वेदविज्ञानम्)
विश्वदीप-अक्रमशोष-संस्थानम्,
जयपुरम्

अध्यात्म संस्थानं सप्तविध प्राणात्मकं भवति। इमे सप्त प्राणा: चतुर्ण्णाम् इन्द्रियाणां स्वतन्त्र विभागेन सम्बुद्धानि सन्ति। इमानि चत्वारि इन्द्रियाणि सन्ति-वाक, प्राण:, चक्षु, श्रोत्रञ्चेति। एषु नागिन्द्रियानुगत: मुखप्राण: घ्राणेन्द्रियानुगतं नासाप्राणद्वयं चक्षुरिन्द्रियानुगतं चक्षुष्प्राणद्वयं क्षोत्रेन्द्रियानुगतं श्रोत्रप्रणयञ्च विज्ञेय:। नासाप्राण: चशुष्प्राण: श्रोत्रपापश्च त्रय एते यमजप्राणा: सन्ति। अतएव प्राणिशरीरे नासापुटद्वयं चक्षुर्द्धये श्रोत्रद्वयं च जायन्ते । मुखप्राणस्य यमजत्वाभावान्मुखमेकमेव। एवमेते सप्तविधप्राणा: साकञ्ज प्राणा उच्यन्ते। इमे प्राणा देवजा: सन्ति अर्थात् देवेभ्य इमे समुत्पन्ना: । एषु प्रथमो मुखप्राण: वागिन्द्रियस्याधिष्ठानभूत:। स चाग्निना समुत्पन्न: । अतएव शतपथ ब्राह्मणे सम्प्रोक्तम्- श्अग्निर्वैवाग्श इति ।

गोपथ ब्राह्मणमप्यस्य समर्थन करोति। तत्र चेदमप्युक्तं यत् 'या वाक् सोऽग्नि' रिति । एतरेय आरण्यकमपि प्रकारान्तरेण अस्यैव तथ्यस्य समर्थनं करोति। अग्नि, प्रगणिशरीरस्थे सौर प्राणे विद्यमानो भवति अत: वाचा सह तस्य नियत सम्बन्धो नित्य सम्बन्धो वा मन्तव्य: । वाक् च सौरप्राणश्च उभौ यदा मिथुनीभावं प्राप्नुतस्तदा श्मनस्श इति अतिविशिष्टं तत्त्व मन्त:करणस्याधाररूपमुत्पयेते। वाचो मिथुनीभावादेव मुखमिन्द्रियमेकं सदपि कार्यद्वयं सम्पादयति शब्दोच्चारणस्य अशनपानादेश्च। वाग्नि: प्राणिनां वाचं वितनोति । एवमेव च या वैश्वानराग्ने: प्रतिरूपभूता वागस्ति, सैव भोजनादान विसर्गयो: प्रक्रियां सम्पादयति ।

नासाप्राण: प्राणेन्द्रियस्याधिष्ठानभूत: । स चाश्विभ्यां समुत्पन्न:। प्राणिनां श्वासोच्छ्वास रूपे नासाप्राण एवं गतिं करोति। अश्विनौ युग्मदेवतारौ अभिमतौ अतएव नासाप्राणोऽपि युग्मरूपे स्वाधिर्भवति। तत्रैको नासाप्राण: दक्षिणनासापुटेन अपरश्च वामनासापुटेन सक्रियौ भवत: । अयं उभयविध नासाप्राण: श्वासाय आयामं प्रददाति। शरीरान्तर्वर्त्तिन: पच्चप्राणा: प्राणापानोदानसमान व्यानाख्या: अपि अनेन युग्मनासाप्राणेन उपकृता भवन्ति । यतो हि एतत्समानान्तरमेवैतेषां सक्रियता सम्भवति ।

चक्षुष्याणो नेचेन्द्रियस्याधिष्ठान भूत: । स सूर्यचन्द्राभ्यां समुत्पन्न: । अनयोग्य सूर्यचंद्रयो: सूर्य प्रकाशनशके: प्रदाताऽस्ति चन्द्र: पुन: सूर्या सूर्यचन्द्रयोष्मण: अपवर्जनं करोति। देवद्वयोत्पद्यमानत्वाच्चक्षुष्याणोऽपि यमजप्राण एव। अयमपि दक्षिणचक्षुषा वामचक्षुषा व सक्रियो भवति। चन्द्रमसाऊष्मणोऽपर्जना च्चक्षुष्प्राणो जलवाष्पमयो भवति । कदनादिक्रिया समकालं पुनरिदमेव जलवाष्पं अश्रुरूपेण बहिर्निस्स्रति।

श्रोत्रप्राण: कर्णेन्द्रियस्याधिष्ठानभूत:। अयं मातारेश्वमा समुत्पन्न:। प्राणिनां श्रवणशक्तेरयमेव प्रदाता। मातरिश्वा सौरप्राणं द्विधा विभनक्ति । सौरप्राणस्य तौ द्वावेव भागौ श्रोत्रप्राणमुत्पादयत: । द्वाभ्यां जायमानत्वादयमपि क्षोत्रप्राणो यमजप्राण: किन्तु अध्यदेवो मातरिश्वा त्वेक एवं तस्मादुभयोरपि कर्णयो: कार्य त्वेकमेव श्रवणमिति। एवमध्यात्म संस्थाने प्राणिनां प्रथमायां शिरोगुह्यां विद्यमाना: सप्त साकंज प्राणा वेदविज्ञानवेतृभि: प्रतिपादिता: सन्ति। एते पुन: शिरो गुहातिरिकम् उरो गुहायां उदरगुहायां वस्तिगुहायां चापि क्रियान्विता: भवन्ति।

एषां सप्त साजञ्ज प्राणानां द्वितीय: प्रस्तार उरोगुह्यां लक्ष्खते। उरोगुहाया: सप्तविध सामान प्राणा अपि क्रमशो मनस् हस्तौ रसना घ्राणश्चेति चतुर्ण्णामिन्द्रियाणां स्वतन्त्रविभागेन सम्बद्धा: सन्ति। एषु मनोऽनुगत: हृदयप्राण: हस्तानुगतौ हस्तप्राणो रसनानुगतौ स्तनप्राणौ घ्राणानुगतौ च फुफ्फुसप्राणौ सम्प्रोक्तौ। हृदयप्राणं वर्जयित्वा शेषा: सर्वे प्राणा: यमजा एव भवन्ति। इमे अपि देवज प्राणा उच्यन्ते। एषु प्रथमो हृदयप्राण: मनस: अधिष्ठानमुक्तम्। अयं इन्द्राविष्णुभ्यां समुत्पन्न: अतएवास्य देवतारौ इन्द्राविष्णु भवत:। इन्द्रस्य शक्त्या अयं हृदयप्राण: रुधिरस्य संग्रहणं विदधाति विष्णोश्च शक्त्या रुधिरं प्रसारयति । इन्द्रस्य सौर प्राणत्वात् हृदयस्य सक्रियता नैरन्तर्समाप्नोति। सैव चौतन्याध्यमेन जीवनक्रियां सञ्चालयति।

हस्तप्राण: हस्तयोरचिष्ठानभूत: कथित: । अयं हिहस्ताण इन्द्राग्नीभ्यां समुत्पन्न:। इन्द्राग्नी यदा हिरण्यगर्भेण संप्रक्तौ भवतस्तादेस्य हस्तप्राणास्याविर्भावो भवति । इन्द्रप्राणस्य संसर्गादयं हस्तप्राण: आदानं कर्म सम्पादयति । एवमेवाग्नेश्च संसर्गात्पोषणदिकर्माणि अनेन हस्तप्राणेन सम्भाव्यन्ते । रसनाख्य: प्राण: उभयो: स्तनयोरधिष्ठानमस्ति । अस्य देवतारौ सोमपरमेष्ठिनौस्त: । सोमसंपृक्तेरयं प्राण: रसस्य घनीभावं करोति। परमेष्ठिनश्च संसर्गान्मूर्तिमान् (रूपवान्) भवति। सूर्य बृहस्पतिभ्यां समुत्पन्नौ वाजप्राणोऽप्यनेनैव रसनाप्राणेन संपृक्तो भूत्वा प्राणिशरीरे जठराग्निमुद्रीपर्यति।

इदमस्य रसना प्राणस्यानंतरीयं कर्म।

फुफ्फुसापस्थाधिष्ठानं प्राणेन्द्रिय मुक्तम् । अयं हि फुफ्फुसप्राण: वरुणेन्द्राभ्यां समुत्पन्नौ वर्तते। इन्द्रप्राणेन युक्तो हि ऐन्द्रवायु दक्षिणफुफ्फुसं सक्रिय करोति। एवमेव वरुणप्राणेन युक्तो वारुणवायु: वामफुफ्फुसे सक्रियं करोति। इमावुमौ वायु इडापिंगलाभ्यां नाडीभ्यामपि सम्बद्धौ भवत: । अनयोर्यो वारुणवायु: स इडया सम्बद्धो भवति, यश्च ऐन्द्रवायु: स: पिंगल्या सम्बद्धो भवति। यद्यपि वरुणेन्द्राावियौ मिथो विरोधित्वमापन्नौ स्तस्तथापि श्वासोच्छ्वास क्रियाया मनयोर्विरुद्धवं प्राणिनां कृते महदुपकारि विज्ञेयम्। तथा हि अनयोर्गतिभियो विरुद्धत्वादेव श्वासोच्छ्ष्वासक्रिया-रूपेण लक्षिता भवति।

साकञ्ज प्राणानां तृतीय: प्रस्तार: उदरगुहायां भवति। उदरगुहायां विद्यमाना: सप्तप्राणा अपि वाक् मनस घ्राण उपस्थ इत्येतेषां चतुर्ण्णाम् इन्द्रियाणां स्वतन्त्र विभागेन सम्बद्धा भवन्ति । इमे अपि प्राणा देवजा उक्ता: । एषु वागनुगतो नामिप्राण:, मनोनुगतो यकृत्प्राण:, घ्राणानुगत: क्लोमप्राण:, उपस्थेन्द्रियानुगतो वृक्कप्राण: भवति। नाभिप्राण: वाच एवाधिष्ठानभूत: । परावाच आश्रयोऽयमित्यपि कैश्चिदुक्तम्। वायोरालम्बनेनायं प्राण: परांवाच मूर्ध्व प्रसारयति । अयं च बृहस्पतिना समुत्पन्न: अतएवास्य देवता बृहस्पतिरास्ति । अयमेव वाचं नामितो हदये, हृदयत: कण्ठे, कष्टतो मुखे प्रणयति ।

नाभौ या वाक् सा परेस्युच्यते । हृदये या वाक् सा पश्यन्तीत्युच्यते। कण्ठे या वाक् सा मध्यमेहमुच्यते। मुखनेयमेव वाक् वैश्वदीरूपेणोत्त्वरिता भवति।

यकृत्प्राणां मनसोऽधिष्ठानभूत:। एवञ्च मनसोऽयमेव परमम्प्रय:। यदन्नं प्राणिनो भुञ्जते अथवा च यत्पेयं प्राणिन: पिबन्ति, तदीये रससर्वस्वमयं यकृत्प्राण एव आकर्षति । अयमपि यमजप्राण: । यमेन्द्रावस्य देवतारौ स्त: । आदित्यप्राणेनेन्द्रेण संप्रत्यत्वादयं यकृत्प्राण: रसमादते, यमसंपृक्त्या च पुन: तं संमतं करोति। एवञ्चान्नरसस्य संयमनं यकृत्प्राणस्य कार्यमस्ति । इन्द्रस्य वैश्वानर संसर्गादयमेव जठराग्निमपि दीपयति तथैव च समसंसर्गात्तं नियम्यति। एवञ्चायं द्विधा कार्य कुरुते ।

क्लोमप्राणोऽपि प्राणेन्द्रियस्याधिष्ठानं कथितम् । अस्य देवतारो मरुत: सन्ति। मरुद्गणा वायुसम्पीडनं कुर्वन्ति येन सक्रियो भूत्वाऽयं क्लोमप्राण: फुफ्फुसद्वये संकोचविस्तारयो: प्रक्रियां सञ्चालयति। एतद्वशादेव श्वसनतन्त्रं प्राय: सक्रियं तिष्ठति । उपस्थेन्द्रियानुगतो वृक्कप्राण उपस्थस्यैवाधिष्ठानमभि: मतम्। अस्य देवतारौ यमवरुणौ स्त: । एतौ यमवरुणौ एतदीयं कार्यमुक्तान्नस्य द्वयं सम्पादयति। इमावादौ वृक्कप्राणेन गृहीतं भुक्तान्नस्य प्रवर्ग्यभूतं रसभागं शोध यत:। येन स: भुक्तान्नप्रवर्ग्यो रस: भूत्ररूपे परिनतो भवति। यमवरुणावेव अपावायो: संसर्गा देनं मूत्राशय प्रणयत:।

साकञ्ज प्राणानां तुरीय: प्रस्तारे वस्ति गुहायां भवति। वस्तिगुहाया: सप्तविधप्राणा अपि वायुपादोपस्थमनसां चतुर्ण्णामिन्द्रियाणां स्वतन्त्र विभागेन सम्बद्धा भवन्ति । इमे अपि देवजप्राणा उच्यन्ते । एषु पाखनुगत: गुदप्राण:, पादानुगत: श्रोणीप्राण:, उपस्थेन्द्रियानुगतौ योषावृषाप्राणो, मनोऽनुगत: शुक्रप्राणरच विज्ञातव्या: । गुरुप्राण: पायुरिन्द्रियस्याधिष्ठानभूत: । अयं हि गणपतिना समुत्पन्न: । गणपतिदेवास्य देवता। अतएव वायं गणपति प्राण इत्यामुच्यते।

अयमेव गुरुप्राणो गणपतिप्राणो वा भुक्तानस्य नीरसं प्रकर्यम् आदत्ते, तस्य शोधनं करोति । अनेन तत्कृतशोधनेन नीरसप्रवर्ग्यमिदं मलरूपे परिणतं भवति। गणपतिप्राण एवं अपानवायो: संसर्ग प्राप्यामुं मलाशयं प्रणयति। श्रोणी प्राण: पादइन्द्रियस्याधिष्टानभूत: कथित:। अयं श्रोणी प्राण: सोमपूष्णो: समुत्पन्न: । एवञ्च सोम: पूषा चेतुभावस्य देवतारौ।। अयमपि यमजप्राण:। द्विपदत्वान्मनुष्याणां श्रोणी प्राण: द्विधा विभज्यते दक्षिण श्रोणी प्राण: वाम श्रौणी प्राणश्च । अनयो: दक्षिण श्रौणी प्राण: पूष्ण आयत्तो भवति वामश्रोणी प्राणश्च सोमायत्तो भवति। सोमो घनीभूतस्य कारको भवति, अत एवायं मेदो घनीभूतं करोति । पूषा च तत्पोषणं करोति। अस्थ्नां परिपक्वतायां पुष्टौ चाप्यनयोरेव श्रोणी प्राणयोर्हेतुत्वमुक्तम् ।

योषावृपाप्राणावपि उपस्थेन्द्रियस्याधारभूतौ उक्तौ । इमौ वृष्णयो: स्थानापन्नौ भवत: । इमावप्यपान वायुसंसर्ग प्राप्य उपस्थेन्द्रियं सन्तानोत्पत्ति योग्यं कुरुत:। अनयोर्यो योषा प्राण: स योनिं वृषाप्राणस्याधानयोग्यां विदधाति । यश्च वृषाप्राण: स लिंग: शुक्रस्याधानयोग्यं विदधाति । शुक्रप्राण: मनस आधार भूतो भवति। मित्रोर्चिषी अस्य देवतारौ स्त:। अनयोर्यो मित्र: स प्राणिशरीर बलस्य आधानं करोति । तन्माध्यमेन चेन्छामूलक कामं प्रवर्त्तयन्ति। मूत्रवाहिन्यां नलिकायां मूत्रावरोधोऽप्यनेनैव क्रियते । यश्चार्चि: स: शुक्रं संग्रह तस्य शुक्रवाहिन्यां नलिकायां सन्निरोधं करोति। एवमेते साकञ्जप्राणा: प्राणिशरीरेन्द्रियाणि सक्रियाणि कुर्वन्ति येन प्राणिशरीरं सक्रियं भवति ।

## उज्जयिनीस्थ पाणिनिसंस्कृतविश्वविद्यालयस्य परियोजना भारतसर्वकारस्य अष्टादशी परियोजनान्तर्गता स्वीकृताः

(वार्ताहरः- डॉ.दिनेशः चौबे )

नवदेहलीस्थ भारतसर्वकारस्य शिक्षामन्त्रालयस्याधीनं केंद्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशी परियोजनानन्तर्गते उज्जयिनीस्थ महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य तिस्रः परियोजनाः स्वीकृताः। भारतीयज्ञानपरम्परायाः प्रणेताराः ऋषयः




,आचार्याः तेषां अवदानाधारितं चलचित्राणां निर्माणं , शास्त्रार्थकौशलप्रशिक्षणं, शास्त्रसुधा नामिकाः परियोजनाः अंतिमरूपेण स्वीकृताः।

व्याकरणविभागप्रमुखः डॉ. अखिलेशकुमारद्विवेदिमहोदयस्य प्रधानगवेष्कत्वेन भारतीयज्ञानपरम्परायां महापुरुषाणां योगदानम् इति विषये चलचित्राणां निर्माणं भविष्यति , परियोजनेयम् एकवर्षस्य भविता प्रमुखवैय्याकरणानां केन्द्रितं चलचित्राणां संस्कृत-हिन्दी-अङ्ग्रेजी भाषासु निर्माणं करिष्यते, अनेन सञ्चार-प्रौद्योगिक्याः तकनीकीमाध्यमेन संस्कृतस्य प्रचार-प्रसारः भवेत् । ‘शास्त्रार्थकौशलप्रशिक्षणम् परियोजनायाः प्रधानगवेषकः साहित्यविभागप्रमुखः डॉ. तुलसीदासपारौहामहोदयः अस्ति भारते शास्त्रार्थस्य महान् परम्परा वर्तते किन्तु संप्रति सा परम्परा विनष्टा भवति अतः शास्त्रसंरक्षणं कर्तुं शास्त्राणां पूर्वपदम् उत्तरपदं मधि कृत्य प्रशिक्षणं प्रदास्यते।अनेन नानाशास्त्रेषु योग्यविद्वांसः सज्जी भविष्यन्तीति।शास्त्रसुधा परियोजनायाः प्रधाननिदेशकः योगविभागप्रमुखःडॉ. उपेन्द्र भार्गवमहोदयः वर्तते अस्यां परियोजनायां ज्योतिषशास्त्रस्य शिक्षण सामग्र्याः सरलभाषया चलचित्रं निर्मीयते यस्मिन् पञ्चाङ्गनिर्माणं,ग्रहणविचारः, ग्रहगतिः,वेधशालानिर्माणादयाः समावेशः करिष्यते। अनेन छात्राणां सामाजिकानाञ्च महान् लाभः भविष्यति।

विश्वविद्यालयस्य मान्यः कुलपतिः आचार्यविजयकुमारसीजी वर्यस्य निर्देशने बहूनां भिन्नविषयकानां उपक्रमाणां आयोजनं विश्वविद्यालयेन क्रियते। आस्मिन्नैवक्रमे ष्भारतीयज्ञानपरम्पराध ारिते ‘इति विषये स्वीकृतं परियोजनाकार्यं प्रचिलिष्यति। अस्मिन्नवसरे कुलपतिवर्यःसर्वान् शुभकामनाः प्रदृतवान । विश्वविद्यालयस्य कुलसचिवः डॉ. दिलीपसोनीमहोदयः उक्तवान् यत् कुलपतिमहोदयस्य कुशलनिर्देशने दिनानुदिनं विश्वविद्यालयस्य सर्वविधं विकासः जायमानो वर्तते ।आचिरादैव देशस्य अग्रणी विश्वविद्यालयेषु पाणिनिविश्वविद्यालयस्य नामोल्लेखः संभविष्यतीति।

## संस्कृतसंस्कृतिविकाससंस्थानेन आन्ध्रप्रदेशप्रान्तेन व्याख्यानम् आयोजितम्

“श्रीरामगुणकीर्तनम्” इति विषयमधिकृत्य संस्कृतसंस्कृति-विकाससंस्थानस्य आन्ध्रप्रदेशप्रान्तेन 30.03.2023 तमे दिनाङ्के सायं 06.00 वादने विशिष्टव्याख्यानम् आयोजितम्। कार्यक्रमस्य आरम्भः डॉ० दुर्गाशरणरथमहोदयेन वैदिकमङ्गलाचरणेन कृतः। तदनु डॉ० चितरंजननायकमहोदयेन सर्वेषां समागतानां स्वागतं व्याहृतम्। मुख्यवक्ता आचार्यः चक्रवर्तीरंगनाथनमहोदयाः राष्ट्रियसंस्कृतविश्वविद्यालय साहित्यविभागस्य विभागाध्यक्षाः सन्ति। एते महोदयाः अत्यन्तं प्रभावपूर्णव्याख्यानेन भारतयीसंस्कृतेः रामचरितमानसस्य पोषकत्वं, एवं रामस्य गुणः एवं रामनवमी उपलक्ष्ये प्रतिपादितवन्तः।

कार्यक्रमे अस्मिन् डॉ० प्रदीपकुमारबाग समेषां कृते धन्यवादः एवं च कार्यक्रमोऽयं समीचीनरीत्या चालितः। कार्यक्रमे राष्ट्रियाध्यक्षाः आचार्याः राधागोविन्दत्रिपाठीमहोदयाः, प्रान्ताध्यक्षाः आच्यर्याः एस.दक्षिणामूर्तिशर्मामहोदयाः, उपाध्यक्षाः डॉ.ए. सच्चिदानन्दमूर्तिमहोदयाः , महिला अध्यक्षा डॉ. पारमितापण्डामहोदयाः,डॉ० वी धर्मदासनमहोदयाः, डॉ० कृष्णकुमारभार्गवमहोदयाः, डॉ० अश्वनीकुमारमहोदयाः, डॉ.डि. ज्योतिमहोदयाः, महिला सचिवा डॉ. एस्. वैष्णवीमहाभागाः, तथा राष्ट्रस्य विविधप्रान्तेभ्यः नैके विद्वांसः तथा छात्राश्च समुपस्थिताः आसन्। शान्तिमन्त्रेण कार्यक्रमः अयं सुसम्पन्नः।

# पूर्णे विश्वे सनातनस्य प्रतिष्ठायै पतंजलिः करोति महदकार्यम्-साध्वीऋतंभरा

हरिद्वारम्। पतंजलि सन्यास आश्रमस्य तत्वाधाने आयोजिते दश दिवसीये सन्यास दीक्षा महोत्सवे साध्वी ऋतंभरा कथितवान् यत् पतंजलि योगपीठेन पूर्णे विश्वे सनातनं प्रतिष्ठायितुं महत् कार्य जायते। स्वामिनः रामदेवस्य नेतृत्वे सन्यासिनां शृङ्खला सज्जीकरोति, सः पूर्णे विश्वे सनातन धर्मस्य व भारतीय संस्कृतेः प्रचारं प्रसारं च करोति यतः पूर्व पतंजलि योगपीठस्य महामंत्री आचार्य बालकृष्णः साध्वी ऋतंभरायाः पुष्पगुच्छेन स्वागतं कृतवान्। अवसरेस्मिन् पर स्वामी रामदेवः कथितवान् यज्जीवने सन्यासः इव महत्त्पः, महान् त्यागः नास्ति स सन्यासी नाम पूर्णविवेकः ,पूर्णश्रद्धा इत्याभ्यां परिपूर्णः। श्रद्धा, भक्तिः, समर्पणं कृतज्ञता इत्येषां पराकाष्ठा एव सन्यासः वर्तते। अत्र शताधिकं विद्वांसः भ्रातरः विदुष्यः भगिन्यश्च स्वीयं सर्वस्वं समर्प्य सन्यास मार्गं चलितुं तत्परः।

आचार्य बालकृष्णः कथितवान् यत् स्वामी रामदेवः योगम् आयुर्वेदं च प्रतिस्थापनेन सह एकस्य आदर्शसन्यासीस्वरूपं जन-जनपर्यन्तं प्राप्यते। तस्य मानसं वैराग्येण, त्यागेन, ऋषिपरंपरया, प्राचीनभारतीयमूल्येन आदर्शैश्च परिपूर्णम् । अवसरेस्मिन् भारतीय शिक्षा परिषदः कार्यकारी अध्यक्षः श्री




एन पी सिंहः , श्री अजय आर्यः, बाबू पदम सेनः, पतंजलि विश्वविद्यालयस्य प्रति कुलपतिः प्रो. महावीर अग्रवालः, साध्वी देवप्रिया, डॉ जयदीप आर्यः, स्वामी परमार्थ देवः, स्वामी आर्षदेवः पतंजलि गुरुकुलस्य विद्यार्थिगणश्च उपस्थितः।

# संस्कृतभारत्याः प्रान्तसमीक्षायोजनागोष्ठी

दिनांकः 18-19/03/2023 तमे व्रजप्रान्ते मथुरायां जैनचौरासी मंदिरे संस्कृतभारत्याः प्रान्तसमीक्षायोजनागोष्ठी सम्पन्ना जाता। न्यासाध्यक्षः श्रीमान् ओमप्रकाशबंसलमहोदयः मुख्यवक्ता प्रांतप्रशिक्षणप्रमुखः श्रीमान् सतीशशर्मा आचार्यः मन्दिरस्य



गणमान्यः शिखरचन्द्रमहोदयः च भारतमातरं सरस्वतिमातरं च समर्च्य दीपं च प्रज्ज्वाल्य कार्यक्रमस्य आरम्भम् कृतवन्तः। उद्घाटनसत्रे मुख्यवक्ता आचार्यसतीशशर्मा संस्कृतभारत्याः स्वरूपं उद्देश्यं च स्पष्टं कृत्वा कार्यकर्तृणाम् कार्याणि कानीति विवेचितं। न्यासाध्यक्षः श्रीमान् ओमप्रकाशबंसलमहोदयः उक्तवान् यत् संस्कृतमाध्यमेन एव वयं परं वैभवं प्राप्स्यामः। अनन्तरं शिखरचंद्रमहोदयवर्यः उक्तवान् इदानीं समये अपि जनाः संस्कृतं वदन्ति स्म; बहुसमयपश्चात् मया दृष्टम्, संस्कृतभारत्याः माध्यमेन वृहद्स्तरे विविधाः प्रकालपाः प्रचलन्ति। अस्य सत्रस्य संचालनं प्रान्त सहमन्त्री श्रीमान् गौरवगौतमः कृतवान। द्वितीयसत्रे प्रान्तमंत्री धर्मेन्द्रअग्रवालमहोदयेन गतवर्ष कृतकार्यक्रमाणां समीक्षा कृता। अनन्तरं प्रान्तसंघटनमन्त्रिणा श्रीमान् नरेन्द्रमहोदयेन मार्गदर्शनं कृतं। पुनश्च तृतीयसत्रे प्रांतकार्यकारिणीसदस्यः डॉ०राधेश्यामअवस्थीमहोदयः उपस्थितः। मुख्यवक्तागौरवगौतमेन अप्रैल 2023तः सितम्बर 2023 पर्यन्तं आगामीसत्रस्य योजना प्रतिपादिता। अस्य सत्रस्य संचालनं बरेलीमहानगरस्य मन्त्री ऋषभभारद्वाजः कृतवान। ततश्च अन्तिम सत्रे प्रांताध्यक्षा डॉ०तुलसीदेवीमहोदयाः पञ्चाङ्गविमोचनपुरस्सरं समस्त कार्यकर्तृणाम् धन्यवादं ज्ञापितवती। कार्यक्रमेस्मिन् द्वादशजनपदेभ्यः कार्यकर्तारः उपस्थिताः आसन्। कार्यक्रमस्य अन्ते सर्वे जनाः शान्तिमन्त्रं उक्तवन्तः।

## प्रो.कुलदीपशर्मणे नवोदितप्रतिभा पुरस्कारः



जयपुरस्थया राजस्थान - संस्कृत-अकादम्या प्रख्यातसंस्कृत- लेखकाय सुकवये प्रो.कुलदीपशर्मणे नवोदितप्रतिभापुरस्कारः प्रदास्यते। देहलीस्थस्य केन्द्रीयसंस्कृत- विश्वविद्यालयस्य आचार्यः कुलदीपशर्मा राजस्थानस्य जयपुरनगरे जन्म अलभत। आचार्यस्य शिक्षा जयपुर एव अभूत्। प्रो.शर्मा यथा संस्कृतं हिन्दी- राजस्थानी -आंग्लभाषाविदपि वर्तते। आचार्यस्य प्रकाशितासु कृतिषु- भारतीयं शिक्षादर्शनम्, सचित्रं प्रहेलिकाशतकम्, संस्कृत -शिक्षण-भूमिका , संस्कृतशिक्षणदीपिकाद्याः मुख्याः सन्ति। प्रागपि प्रो.कुलदीपशर्मा राष्ट्रपति-संस्कृतयुवप्रतिभा- साहित्याकादमी-बालसाहित्याद्यनेकैः लब्धप्रतिष्ठैः पुरस्कारैः विविधैः सम्मानैश्च विभूषितोऽभूत्। राजस्थान-संस्कृत-अकादम्या नवोदितप्रतिभापुस्काररूपेण प्रो. कुलदीपशर्मणे एकं प्रशस्तिपत्रम् एकपञ्चाशत्सहस्रं रूप्यकाणि च प्रदास्यन्ते।



# देशं महान्तं निर्मातुम् अर्थ-शक्तिः ज्ञानशक्तिश्च महत्त्वपूर्णे

भारते सैन्यशक्तिः आसीत् अधुना समयपरिवर्तनेन ज्ञानशक्तेः कालः अप्यागतः। ज्ञानशक्ति वर्धने विश्वविद्यालयस्य भूमिका महत्वपूर्णा। कंचनापि देशं महान्तं निर्मातुम् अर्थ-शक्तिः एवं च ज्ञान शक्तिः उभयमपि महत्वपूर्णम्। सम्पूर्ण ज्ञानशक्ति द्वारा अष्टावधान क्रिया विधातकनिकज्ञानवृद्धेः वा उत्कृष्टक्षमता प्रदर्शनमेव वर्तते। उक्त विचारः सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य 66 तमे स्थापनोत्सवे पाणिनि भवन सभागारे



विश्वविद्यालयस्यास्य भारतीय ज्ञान परम्परा केन्द्रस्य उत्तर प्रदेश संस्कृत संस्थानस्य च संयुक्त तत्वावधाने अखिल भारतीय अष्टावधान कार्यक्रमः यः विंशति वर्षाणां पश्चात् जायमानः वर्तते। यत्र मुख्यातिथिः महर्षि पाणिनि संस्कृत एवं वैदिक विवि उज्जैनस्य कुलपतिः प्रो विजय कुमार मेननः व्यक्तवान् । विशिष्टातिथिः पूर्व कुलपति एवं च अन्ताराष्ट्रिय कवि पद्मश्री प्रो अभिराज राजेन्द्र मिश्रः कथितवान् यत् अवधानस्य इयं क्रिया विधा वा अत्र दशकानाम् अनन्तरं कृत्वा पुनः अस्याः विधायाः पुनर्स्थापनायाः प्रयासः वर्तते । केन्द्रीय उच्च तिब्बती शिक्षा संस्थानस्य, (सारनाथः) कुलपतिः प्रो गेसे नवांग समतेनः कथितवान् यत् अस्य विश्वविद्यालयस्य स्थापनायां तिब्बती संस्थानमपि समाहितम् । अष्टावधानस्य विधा प्राचीन शास्त्रेषु निहिता ज्ञानराशिः वर्तते। दुर्गावती विवि, जबलपुरस्य प्रो रहसबिहारी द्विवेदी अष्टावधानमिति एका साहित्यिक चर्चा वर्तते । अत्र एकस्य विदुषः बुद्धेः परिक्षणम् अन्यैः अष्टभिः विद्वद्भिः कृतम्। केन्द्रीय संस्कृत विवि, शृंगेरी, कर्नाटक परिसरस्य अष्टावधानी डॉ उमामहेश्वर एन्ट्टने अष्टावधानस्य विधायाम् एकं काव्यं निर्मातुम् अष्ट प्रश्नाः पृच्छ्यन्ते स्म। तत्र प्रश्नकर्तारः भवन्ति स्म। येषां कार्यं रचनाकारस्य सम्मुखं बाधोत्पादनम्। प्रो धर्मदत्त चतुर्वेदी, प्रो कमलाकान्त त्रिपाठी, डॉ ज्ञानेन्द्र सापकोटा, प्रो विजय कुमार पान्डेयः, प्रो कमलेश झा, प्रो शिवराम शर्मा इत्यादयः स्वविचारान् प्रस्तुवन्तः। अध्यक्षतां कुर्वन् कुलपति प्रो हरेराम त्रिपाठी कथितवान् यत् देशस्य अतिविशिष्टः, प्रसिद्धः अष्टावधानी डॉ उमाशंकरः एन शृंगेरी इत्यस्य भारते विलुप्यते विधाम् एनां जागरितुं विशेष ज्ञान शाखां प्रदर्श्य जागर्ति। येन अनेके विद्यार्थिनः लाभान्विताः सन्तः एतया विधया परिचिताः स्युः विलुप्यमाना विधा इयं संरक्षिता स्यात्।

## "संस्कृतभाषाशिक्षणवर्गः" इत्यनेन सह "गृहे गृहे संस्कृतम्" सम्पूर्णं राज्यं लाभं प्राप्स्यति - विनयश्रीवास्तवः

वार्ताहरः - सचिन शर्मा

उत्तरप्रदेश संस्कृत संस्थानम् उत्तरप्रदेशसर्वकारस्य भाषाविभागस्य अन्तर्गतं मार्चमासे प्राविधिकस्तरं क्रियमाणानां कक्षाणां समाप्तौ, जेसी अतिथिगृहे सप्तदिवसीयस्य शिक्षकप्रशिक्षणस्य च समाप्तेः अवसरे, गृहे गृहे संस्कृत योजना अन्तर्गत निरालनगरे संस्थाननिदेशकः विनयश्रीवास्तवः कार्यक्रमे प्रशिक्षुभ्यः प्रशिक्षकेभ्यः च प्रमाणपत्रं वितरितवान् । प्रशिक्षून् सम्बोधयन् सः अवदत् यत् भवन्तः मण्डलस्तरस्य संस्थायाः राजदूतरूपेण कार्यं करिष्यन्ति। उत्तरप्रदेशस्य संस्कृतसंस्थानं शीघ्रमेव जिलास्तरस्य समन्वयकान् स्थापयिष्यति, न केवलं ऑनलाइन, अपितु प्रथमचरणे प्रत्येकस्मिन् गृहे संस्कृतभाषास्तरं सुदृढं कर्तुं प्रयतते।

द्वितीयचरणे प्रत्यक्षसंस्कृतप्रशिक्षणस्य कार्यं भविष्यति। यस्मिन् विद्यालय-ग्राम पंचायत-ग्रामप्रमुख-केन्द्र इत्यादीनां सहयोगः स्वीकरिष्यते।

प्रशिक्षणप्रमुखः सुधिष्ठमिश्रः प्रशिक्षणस्य इतिहासं कथयन् प्रशिक्षून् भाषाशिक्षणार्थं प्रेरितवान्।

योजना सर्वेक्षिका डॉ.चन्द्रकलाशाक्यः अवदत् यत् यद्यपि संस्थानम् ऑनलाइन संस्कृतभाषाशिक्षणं, योगप्रशिक्षणं, वास्तु, ज्योतिषशास्त्रं, पुरोहितकर्मादिकं च करोति तथापि एषा "गृहे गृहे संस्कृतयोजना" एकाद्वितीययोजनास्ति, यया सम्पूर्ण राज्यं संस्कृतमयं भविष्यति ।

प्रशासनिक अधिकारी दिनेशमिश्रः अवदत् यत् सिविलसेवापरीक्षायाः निःशुल्कप्रशिक्षणं, कम्प्यूटरसहायकसंस्कृतशिक्षणं, पुस्तकालयः, छात्रवृत्तिप्रशासनं, अनुदानयोजना, पाण्डुलिपिसंशोधनम् इत्यादीनां सर्वयोजनानां पोर्टलद्वारा गृहे उपविष्टेन जनेन लाभः प्राप्तुं शक्यते।

प्रख्यातः भाषाविदः टिकारामपाण्डेयः स्वभाषणद्वारा प्रशिक्षूणां भाषायाः प्रचारार्थं मार्गदर्शनं कृतवान् ।

भाषाविद् विमलेश मिश्र द्वारा शिक्षणचरणेषु सूक्ष्मतया उक्तम् । प्रशिक्षण समन्वयक धीरज मैठाणी, राधा शर्मा च उभाभ्यां समग्रयोजनायाः कार्यान्वयनस्य रूपरेखा प्रस्तुता। अस्मिन् प्रकरणे राधा च...

जगदानन्द झा उभाभ्यां धन्यवादः सभायै

दत्तः उक्तञ्च संस्थानेन गुरु पूर्णिमा, महर्षि वाल्मीकि जयंती, आद्यशंकराचार्य जयंती, धन्वन्तरी जयंती इत्यादयः कार्यक्रमाः निरन्तरं संचाल्यन्ते। अस्मिन् अवसरे प्रशिक्षकः सचिन शर्मा , अमित सामवेदी, नूतनविष्णुरेग्मी, शशिकान्तः, पंकज शर्मा, दीपक पाण्डेयः , राजन दुबे, अंशु गुप्ता, पूजा , मीना, मनीषा, सविता इत्यादिभ्यः एवं 150 प्रशिक्षुभ्यः प्रमाणपत्राणि वितरितानि। प्रशिक्षुषु रमा न्यौपाने , सूर्य प्रकाशः उभाभ्यां संचालनं तरुणः , संध्या गुप्ता, आस्था शुक्लः इत्यादिभिः स्वप्रस्तुतयः अनुभवाः च प्रकटिताः। अवसरेऽस्मिन् पदाधिकारिणः,कर्मचारिणः सामाजिकाः च उपस्थिताः। सर्वेभ्यः प्रशिक्षकेभ्यः प्रशिक्षुभ्यः च पाठ्यक्रमपुस्तकानि प्रदाय कार्यक्रमस्य समापनम् अभवत्। आभासीयमाध्यमेन ऑनलाइन-रूपेण संचालितानां कक्षाणां प्रशिक्षकाः शिक्षिकाः च सम्बद्धाः एव आसन् ।

# संस्कृतेन विना वसुधैव कुटुंबकम् इत्यस्य कल्पना व्यर्था

श्रीभगवानदास आदर्श संस्कृत महाविद्यालये अखिल भारतीय संस्कृत शोध सम्मेलनस्य आयोजनं जातम् । संस्कृत साहित्ये वसुधैव कुटुंबकमिति विमर्शः विषये आयोजिते सम्मेलने वक्तारः संपूर्ण वसुधाम् एक परिवाररूपेण परिभाषितवन्तः। अवसरे उत्तराखंड संस्कृत शिक्षा परिषदः सचिव डा. वाजश्रवा आर्यः कथितवान् सम्मेलने उपस्थित विदुषां व्याख्यानानि संयोज्य परिषदः उपवेशने स्थापितानि। येन पाठ्यक्रमे एतत् सम्मिलितं स्यात्।



रविवारे आयोजिते शोध सम्मेलने सत्रद्वयम् अभवत् । यत्र संभवतः षष्टेः शोधपत्राणां वाचनम् अभवत्। अवसरे उत्तराखंड संस्कृत विश्वविद्यालयस्य कुलपतिः दिनेशचंद्र शास्त्री कथितवान् यत् वेदे कथितं यत्समस्त संसारः नीडः इव वर्तते। वेदे सर्वे भवंतु सुखिनः इत्यस्य कामनां कृत्वा समस्त वसुधां परिवारं निर्माति । मुख्यातिथिः उत्तर प्रदेश संस्कृत संस्थानस्य पूर्वाध्यक्षः प्रो. वाचस्पति मिश्रः संस्कृतस्य विकासः विना वसुधैव कुटुम्बकम् इति कल्पनया व्यर्थः एव । देवप्रयागस्थ केंद्रीय संस्कृत विश्वविद्यालयस्य निदेशकः प्रो. पीवी. सुब्रह्मण्यमः, जिला संघ संचालकः रोहिताश कुंवरः, उत्तराखंड संस्कृत शिक्षा निदेशालयस्य निदेशकः एसपी खाली, भगवान दास आदर्श महाविद्यालयस्य साहित्य विभागस्य निरंजन मिश्रः स्वविचारान् उपस्थापितवान् । सम्मेलनस्य प्रथमसत्रीय-अध्यक्षता केंद्रीय संस्कृत विश्वविद्यालय, देवप्रयाग परिसरस्य आचार्यः प्रो. विजयपाल प्रचेता अकरोत्। विशिष्टातिथिरूपे केंद्रीय संस्कृत विश्वविद्यालयस्यैव शैक्षणिकवृत्तस्य निदेशकः प्रो. वनमाली विश्वालः मुख्य वक्तृरूपेण डा. शैलेश कुमार तिवारी च उपस्थिताः आसन् ।

# वैदिक मंत्रोच्चारणेश्रीदीर्घभगवद्विष्णोः पद्मालयीमहालक्ष्म्याश्च पंचामृतऽभिषेकः

-रामदासचतुर्वेदी



मथुरा। श्री राम जन्म महोत्सव रामनवम्यां मथुरा पुरी बृजमंडल तीर्थ क्षेत्रस्य प्राचीन श्री दीर्घ विष्णु मंदिरे विराजमानस्य श्री दीर्घ भगवद्विष्णोः पद्मालयी महालक्ष्म्याश्च मंगला आरती अभवत् ततः वैदिक मंत्रोच्चारणे वैदिक विधेः अनुसारं,गोदुग्धं ,दधि,घृतं, मधु शर्करा इत्यादीनां द्वारा पंचामृतेन महाभिषेकः कृतः। ततः भगवतः सुगंधित पुष्पैः सहस्त्रार्चनं कृतम्। ततः तस्मै नवीन वस्त्रं प्रदाय शृङ्गारः विहितः। महिलाभक्तमंडलीद्वारा मंगलवर्धापनानां गायनं जातम्। तत्पश्चात् प्रसादवितरणं कृतम् । सायंकाले भगवतः विशेषदर्शनम् अभवत्। सेवायां सहयोगे श्री दीर्घ विष्णु मंदिरस्य महंतः कान्तानाथः चतुर्वेदी,पं.रामदास चतुर्वेदी शास्त्री,सेवायतः बालकृष्ण चतुर्वेदी, लालकृष्ण चतुर्वेदी, पुजारी कदम चतुर्वेदी प्रमुखरूपेण उपस्थिताः आसन्।

## "सीतारामयोः जन्मनः रहस्यम्" इति विषये विशिष्टव्याख्यानम् आयोजितम्

"सीतारामयोः जन्मनः रहस्यम्" इति विषयमधिकृत्य संस्कृतसंस्कृतिविकाससंस्थानस्य आन्ध्रप्रदेशप्रान्तेन 25.03.2023 तमे दिनाङ्के सायं 06.00 वादने विशिष्टव्याख्यानम् आयोजितम्। कार्यक्रमस्य आरम्भः अमरनाथत्रिपाठिना वैदिकमङ्गलाचरणेन कृतः। डॉ.ए.सच्चिदानन्दमूर्तिमहोदयेन समेषां समागतानां स्वागतं व्याहृतम्। मुख्यवक्तिरूपेण श्री अन्नमाचार्यकलापरिषद्, तिरुमल- तिरुपति- देवस्थानम्, तिरुपतिः, आन्ध्रप्रदेशतः श्रीमती.के.नागलक्ष्मीमहाभागा समागता आसन् । एता महोदया अत्यन्तं प्रभावपूर्णव्याख्यानेन सीतारामयोः जन्मनः वृतान्तं वर्णितम् एवञ्च भावपूर्णया हरिकथया सर्वेषां चेतांसि आह्लादितवत्यः।




कार्यक्रमे अस्मिन् समेषां कृते महिलाध्यक्षाभिः डॉ.परमितापण्डामहोदयाभिः आध्यक्षीयभाषणेन सह धन्यवादः समर्पितः। डॉ.एस्.वैष्णवीमहोदयाभिः कार्यक्रमोऽयं समीचीनरीत्या चालितः। कार्यक्रमे राष्ट्रियाध्यक्षाः आचार्याः राधागोविन्दत्रिपाठीमहोदयाः, प्रान्ताध्यक्षाः आचार्याः एस्.दक्षिणामूर्तिशर्ममहोदयाः, उपाध्यक्षाः डॉ.ए.सच्चिदानन्दमूर्तिमहोदयाः, महिला अध्यक्षा डॉ. पारमितापण्डामहोदयाः, डॉ.डि. ज्योतिमहोदयाः, महिला सचिवा डॉ. एस्. वैष्णवीमहाभागाः, डा. प्रदीपबाग्-महोदयाः तथा राष्ट्रस्य विविधप्रान्तेभ्यः नैके विद्वांसः तथा छात्राश्च समुपस्थिताः आसन्। शान्तिमन्त्रेण कार्यक्रमः अयं सुसम्पन्नः।

# उज्जयिनीस्थ पाणिनिसंस्कृतविश्वविद्यालये देवीपूजनपाठविधान प्रशिक्षणस्य शुभारम्भः

(वार्ताहरः- डॉ.दिनेशः चौबे ) उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञान विज्ञानसंवर्धनकेन्द्रस्य तत्त्वावधाने वैक्रमाब्दः २०८० चैत्रशुक्लएकादश्यां तदनु एकतमे दिनाङ्के 'देवीपूजनपाठविधान प्रशिक्षणम्' इत्यस्य शुभारंभः आभासीयपटलमाध्यमेन सञ्जातः प्रशिक्षणमिदं एकदिनाङ्कदारभ्य नवविंशतिदिनाङ्कपर्यन्तं भवेदिति। अस्मिन् प्रशिक्षणे देवीपूजनस्यविध नमंत्रस्तोत्रादि -विषये सरलतया प्रशिक्षणं प्रदास्यते। विश्वविद्यालयस्य मान्यः कुलपतिः आचार्यविजयकुमारसीजीवर्यस्य निर्देशने विश्वविद्यालयस्य केन्द्रेण अस्य प्रशिक्षणस्यामायोजनं क्रियते। उद्घाटनकार्यक्रमे मुख्यवक्तृरूपेण वेदव्याकरणविभागाध्यक्षः प्रभारिनिदेशकः संस्कृतप्रशिक्षणकेन्द्रम् डॉ. अखिलेशकुमारद्विवेदिमहोदयः उपस्थितः आसीत् । महोदयः स्ववक्तव्ये देवीपूजनस्य नैकान् वेदोक्तप्रमुखान् पक्षान् तेषां प्रभावः पद्धतयादि विषये स्वविचारान् उपस्थापितवान्, अस्माकं जीवने तेषां महत्त्वम् उपयोगिता वैशिष्ट्यञ्च प्रतिपादितम्। कार्यक्रमस्य शुभारम्भः वाग्देव्याः सरस्वत्याः समर्चनेन वैदिकमङ्गलाचरणेन च जातः। तदनु वाचिकं स्वागतं प्रास्ताविकं च प्रस्तुतम्। अस्मिन् प्रशिक्षणे देशस्य विदेशस्य जिज्ञासवः सामाजिकाः छात्राः अन्यजनाश्च भागं वहन्तः सन्ति । प्रशिक्षकरूपेण वेदविभागस्य आचार्याः डॉ. अङ्कितशाण्डिल्यः, श्रीप्रणवकश्यपः अन्ये विद्वांसः च सन्ति । सञ्चालनम् आभारप्रदर्शनञ्च कार्यक्रम समन्वयकेन डॉ. दिनेश चौबेमहोदयेन कृतम्। कल्याणमन्त्रेण सह कार्यक्रमस्य समापनं जातम्।

# राष्ट्रिया संगोष्ठी : परात्परतत्त्वविमर्शः

डॉ. मणिशंकरद्विवेदी, नवदेहली

नवदेहलीस्थितेन श्रीशंकरशिक्षायतन-वैदिकशोधसंस्थानेन मार्चमासस्य त्रिंशत्तमे दिनांके 'परात्परतत्त्वविमर्शः' इति विषयमधिकृत्य अन्तर्जालीयमाध्यमेन एका राष्ट्रिया संगोष्ठी समायोजिता। पण्डितमधुसूदनओझाप्रणीतस्य ब्रह्मसमन्वयस्य नामकस्य ग्रन्थस्य द्वितीयानुवाके वर्णितं परात्परतत्त्वम् अधिकृत्य संगोष्ठीयं संपन्नतां गता। अस्यां संगोष्ठ्यां वक्तृरूपेण तिरुपतिस्थस्य राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य अद्वैतवेदान्त-विभागस्य विभागाध्यक्षः प्रो.सतीश के. एस. महोदयः, शृङ्गेरीपरिसरस्य केन्द्रीय-संस्कृत-विश्वविद्यालयस्य वेदान्तविभागीयः आचार्यः प्रो. गणेश-ईश्वर-भट्ट-महोदयः एवं च अहमदाबादस्थितस्य गुजरातविश्वविद्यालयस्य संस्कृतविभागस्य आचार्या प्रो. मयूरी भाटिया महोदया आसीत् । श्रीलाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य न्यायविभागस्य आचार्यः प्रो. महानन्दझामहोदयः कार्यक्रमस्य अध्यक्षः आसीत्।



प्रो. सतीश के. एस महोदयः स्वकीये व्याख्याने उक्तवान् यत् ब्रह्मसमन्वय-ग्रन्थे अष्टौ अनुवाकाः सन्ति। तेषु अनुवाकेषु द्वितीयोऽनुवाकः परात्परानुवाकः अस्ति । परात्परानुवाके ६२ कारिकाः विलसन्ति। प्रथमे अनुवाके निर्विशेषस्य वर्णनं कृत्वा ग्रन्थकारः पं. मधुसूदन ओझावर्यः सविशेषतत्त्वस्य वर्णनं अवशिष्टे अनुवाके कृतवान्। परात्परः सविशेषतत्त्वे समायाति । सविशेषात् ब्रह्मणः सृष्टिः सञ्जायते । इयं सृष्टिः पञ्चधा अस्ति। ते सन्ति-आदिसृष्टिः, परासृष्टिः, भूतसृष्टिः, उत्तरसृष्टिः अनुग्रहसृष्टिश्च। आदिसृष्टौ परात्परः, परासृष्टौ पुरुषः, भूतसृष्टौ पुरम्, उत्तरसृष्टौ यज्ञः, अनुग्रहसृष्टौ विराट् वर्णितः अस्ति।

प्रो.गणेश-ईश्वर-भट्टमहोदयः प्रतिपादितवान् यत् पं.ओझामहोदयस्य अयं ब्रह्मसमन्वयग्रन्थः अद्वैतवेदान्ततत्त्वस्य वर्णने संलग्नः अस्ति। उपनिषदः पारभाषिकशब्दस्य प्रयोगः नूतनविधिना ग्रन्थकारेण कृतः। बृहदारण्यकोपनिषदि आत्मन्वी इति शब्दस्य प्रयोगः समुपलभ्यते। आत्मन्वी इत्यस्य शब्दस्य अर्थः आत्मवान् भवति। आत्मनः अनेकस्वरूपस्य निरूपणं पं.ओझामहोदयैः कृतम। तस्य प्रमाणे विष्णुपुराणस्य वचनं उपलभ्यते। अस्मिन् ग्रन्थे विश्वस्य, विश्वातीतस्य विश्वेश्वरस्य भूम्नः अणिम्नश्च माध्यमेन विवरणं दृश्यते। अयं भूमा अणिमा रसतत्त्वेन बलतत्त्वेन च स्पष्टीक्रियते। वैदिकविज्ञाने अमृततत्त्वं मृत्युतत्त्वं द्वे तत्त्वे स्वीकृते विद्येते। अमृतेन रसतत्त्वस्य मृत्युतत्त्वेन बलतत्त्वस्य ग्रहणं सञ्जायते। यदा बलतत्त्वे रसतत्त्वं तिष्ठति तदा सृष्टिः उत्पद्यते। अत एव ग्रन्थकारः पं. ओझामहोदयः मृत्युतत्त्वे अमृतम् निवसति, एतादृशं प्रतिपादनं कृतम्।

प्रो.मयूरी-भाटिया-महोदया स्वकीये वक्तव्ये निगदितवती यत् पं. ओझामहोदयः परात्परतत्त्वस्य अनेकप्रकारेण वर्णनं ग्रन्थेऽस्मिन् कृतम। यत्र न कोऽपि लघुः महान् वा, क्रियाशीलः अक्रियाशीलो वा, श्वेतः पीतो वा आदिविशेषेण युक्तो न भवति स एव निर्विशेषः। निर्विशेषः अमृतशब्देन निरूपितः। अमृतरूपे निर्विशेषतत्त्वे मृत्युः (बलम्) तत्त्वम् उत्पद्यते। अत एव मृत्युतत्त्वम् अमृतमयम् कथ्यते। मृत्युतत्त्वात् युक्तं रसतत्त्वम् एव परात्परः अस्ति।

अध्यक्षीये उद्बोधने प्रो. महानन्दझामहोदयैः भणितम् यत् पं. ओझामहोदयस्य वैदिकविज्ञानस्य प्रमुखः सैद्धान्तिकतत्त्वे परात्परः अस्ति। एकं तत्त्वं निर्धमकं सर्वधर्मकं च भवेत् तत्र शंका जायते। परन्तु ग्रन्थकारेण कारणकार्यरूपेण विरुद्धवचनस्य सिद्धिः कृता। यथा स्वर्णः निर्विकारः विकारे सति आभूषणं जायते। तथैव कारणरूपे निर्विशेषे ब्रह्मणि उपाधिना सविशेषात्मकं जगत् उतपद्यते।

श्री-रुक्मिणी-वल्लभ-वेद-वेदाङ्ग-संस्कृत-महाविद्यालयस्य वेदाचार्यस्य श्रीकमलराज-उपाध्यायस्य वैदिकमङ्गलाचरणेन संगोष्ठ्याः शुभारम्भः तथा च समापनं वैदिकशान्तिपाठेन जातम्। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतन-वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. मणिशंकरद्विवेद्वी तथा च धन्यवादज्ञापनं डॉ.लक्ष्मीकान्तविमलः कृतवान्। अस्यां संगोष्ठ्यां देशस्य विविधेभ्यः विश्वविद्यालयेभ्यः महाविद्यालयेभ्यः अन्य-शैक्षणिक-संस्थानेभ्यश्च अनेके विद्वांसः शोधच्छात्राश्च सहभागित्वं विधाय कार्यक्रमस्य साफल्ये योगदानं कृतवन्तः।

# नूतनसंस्कृतशिक्षकाणाम् अभिनंदनम्, कक्षाकक्षस्य परिवर्तिष्यते स्वरूपम्

नवदेहली। संस्कृतशिक्षकसंघ दिल्ली द्वारा दिल्लीसर्वकारिविद्यालयेषु नियुक्तानां नूतनानां 350 संख्यकानां पीजीटी, टीजीटी संस्कृतशिक्षकाणाम् अभिनंदनं कृतम्। आर्यसमाजमंदिर टैगोर उद्याने आयोजिते समारोहे प्रो. ओमनाथविमली (विभागाध्यक्षः संस्कृत विभागः, दिल्ली विश्वविद्यालयः) शिक्षकान् अनवरतं स्वाध्यायं कर्तुं प्रेरितवान् । प्रो. यशवीरसिंहः, (मंत्री संस्कृतभारती उत्तर क्षेत्रम्) एकीभूय




छात्रहिताय संस्कृत संरक्षण संवर्धनाय च समर्पिताः भवेमेति उक्तवान। प्रो. जयप्रकाश नारायणः, विभागाध्यक्षः संस्कृत विभागः, जामियामिल्लियाइस्लामिया संस्कृत शिक्षकान् अभिनंदितवान् अपि च उक्तवान् यत् संस्कृतं सर्वेभ्यः वर्गेभ्यः धर्मेभ्यः परं वर्तते। संजय स्वामी, राष्ट्रीय संयोजकः पर्यावरण शिक्षासंस्कृति उत्थान न्यासः उक्तवान् यत् अस्माकं कक्षाकक्षस्य वातावरणं संस्कृतमयं भवेदिति आग्रहः स्यात। डॉ



राजवीरसिंहः उपशिक्षानिदेशकः स्वाभिमानपूर्वक जीवनम् उन्नेतुं शिक्षकेभ्यः गुरुमंत्रं दत्तवान् । कार्यक्रमे उपस्थिताः रजनीशकुमारसिंहः, सचिवः शिक्षा मंत्री दिल्ली सर्वकारः नूतनतकनीकीं शिक्षण-अधिगमे प्रयोक्तुं परामृष्टवान। डॉ वीरेंद्र पाठकः संस्कृत भाषायाः उन्नयनाय संवर्धनाय च ऊर्जया युक्तैः अस्माभिश्शिक्षकैः भवितव्यम् इति उक्त्वा शिक्षकान् प्रेरितवान। संस्कृत शिक्षक संघ दिल्लीसंरक्षकः महाबलमिश्रा, पूर्व सांसदः संस्कृताय तनुर्मनोधनैः निस्वार्थ सेवायै तत्परतायाः संकल्पं दापितवान्। भेदभावैर्विना सर्वेभ्यः वर्गेभ्यः संस्कृतशिक्षकसंघस्य कार्याणि प्रशंस्तवान्। प्रारंभे यज्ञःभजनादीनाम् आयोजनं जातम्। अध्यक्ष डॉ ब्रजेशगौतमः शिक्षकैः शुभकामनाः दत्तवान्। महासचिवः डॉ वी.दयालुः सर्वान् स्वागतीकृतवान्। मीडियासचिवः डॉ ऋता शर्मा शिक्षकेभ्यः संस्कृत शिक्षक संघस्य कार्याणां परिचयं दत्तवती। तत्र आचार्य वीरेन्द्रकुमारआर्यः, डॉ राजेशकुमारः, डॉ हरिदेवआर्यः, डॉ लक्ष्मीनारायणजोशी, पवनकुमारगुप्ता ,डॉ सोहनकुमारः, आर्यसमाजस्य मंत्री श्रीसुनीलचड्ढा इत्यादयः उपस्थिताः।

# प्रो. ताराशंकरशर्मपाण्डेयाय भट्टमथुरानाथशास्त्री-सम्मानः

जयपुर। राजस्थानसर्वकारीय- राजस्थानसंस्कृत अकादम्या एषमः 2022-23 वर्षे प्रदास्यमानः 'भट्टमथुराथशास्त्री-साहित्य सम्मानः' घोषितः। साहित्यक्षेत्रे लब्धयशसो गजलविधाया संस्कृते प्रथमतया प्रयोगकर्तुः भट्ट मथुरानाथशास्त्रिणो नाम्ना संचालितः सम्मानोयं प्रो. ताराशंकरशर्मपाण्डेयाय प्रदास्यते।



गद्य-पद्य-गजल-नाट्यादिविधासु सातत्येन लेखनपरायणः दिल्लीस्थ-साहित्यअकादम्या 'अहमेव राधा अहमेव कृष्णः' इति काव्यस्य संस्कतानुवादकृते सभाजितः प्रो.पाण्डेयः साम्प्रतं चित्तौड़गढ़जिलान्तर्गते निम्बाहेडा-नगरे श्रीकल्लाजी-वैदिकविश्वविद्यालये कुलपतिपदं समलंकरोति। भट्टमथुरानाथशास्त्री-सम्मानोयम् अप्रेलमासे प्रदास्यते।

# प्रोफेसर बनवारीलालगौड़ महोदयाः पुरस्कृताः

जोधपुरम्। आयुर्वेद विश्वविद्यालय जोधपुरस्य पूर्व कुलपतयः प्रोफेसर डॉक्टर बनवारीलाल गौड़ महोदयाः राजस्थान साहित्य महोत्सवे राजस्थान संस्कृत अकादम्या अंबिकादत्त व्यास गद्य पुरस्कारेण पुरस्कृताः । अयं पुरस्कारः गौड महोदये विरचिताम् आयुर्वेदीय कथाष्टकम् कृतिमुद्दिश्य



प्रदत्तः । डॉक्टर बी. डी. कल्ला महोदयः, श्री रमेश बोराणा महोदयः, श्रीमती गायत्री राठौड महोदया च 51000 रूप्यकात्मकं पुरस्कारं सम्मान पत्रेण सह प्रदाय पुरस्कृतवन्तः ।

अस्माकं प्रेरणास्रोतः- स्व.पं० रामकिशोरशर्मा, पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी, डॉ. राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलः- डॉ.सुन्दरनारायणझा, डॉ. सुरेन्द्रमहतो, डॉ. सन्नीकुमार, डॉ. संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेल: sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।